# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ३

अथ पुत्रः पुलस्त्यस्य विश्रवा मुनिपुङ्गवः ।
अचिरेणैव कालेन पितेव तपसि स्थितः ॥ १॥

सत्यवाञ्शीलवान्दक्षः स्वाध्यायनिरतः शुचिः ।
सर्वभोगेष्वसंसक्तो नित्यं धर्मपरायणः ॥ २॥

ज्ञात्वा तस्य तु तद्वृत्तं भरद्वाजो महानृषिः ।
ददौ विश्रवसे भार्यां स्वां सुतां देववर्णिनीम् ॥ ३॥

प्रतिगृह्य तु धर्मेण भरद्वाजसुतां तदा ।
मुदा परमया युक्तो विश्रवा मुनिपुङ्गवः ॥ ४॥

स तस्यां वीर्यसम्पनमपत्यं परमाद्भुतम् ।
जनयामास धर्मात्मा सर्वैर्ब्रह्मगुणैर्युतम् ॥ ५॥

तस्मिञ्जाते तु संहृष्टः स बभूव पितामहः ।
नाम चास्याकरोत्प्रीतः सार्धं देवर्षिभिस्तदा ॥ ६॥

यस्माद्विश्रवसोऽपत्यं सादृश्याद्विश्रवा इव ।
तस्माद्वैश्वरणो नाम भविष्यत्येष विश्रुतः ॥ ७॥

स तु वैश्रवणस्तत्र तपोवनगतस्तदा ।
अवर्धत महातेजा हुताहुतिरिवानलः ॥ ८॥

तस्याश्रमपदस्थस्य बुद्धिर्जज्ञे महात्मनः ।
चरिष्ये नियतो धर्मं धर्मो हि परमा गतिः ॥ ९॥

स तु वर्षसहस्राणि तपस्तप्त्वा महावने ।
पूर्णे वर्षसहस्रे तु तं तं विधिमवर्तत ॥ १०॥

जलाशी मारुताहारो निराहारस्तथैव च ।
एवं वर्षसहस्राणि जग्मुस्तान्येव वर्षवत् ॥ ११॥

अथ प्रीतो महातेजाः सेन्द्रैः सुरगणैः सह ।
गत्वा तस्याश्रमपदं ब्रह्मेदं वाक्यमब्रवीत् ॥ १२॥

परितुष्टोऽस्मि ते वत्स कर्मणानेन सुव्रत ।
वरं वृणीष्व भद्रं ते वरार्हस्त्वं हि मे मतः ॥ १३॥

अथाब्रवीद्वैश्रवणः पितामहमुपस्थितम् ।
भगवँल्लोकपालत्वमिच्छेयं वित्तरक्षणम् ॥ १४॥

ततोऽब्रवीद्वैश्रवणं परितुष्टेन चेतसा ।
ब्रह्मा सुरगणैः सार्धं बाढमित्येव हृष्टवत् ॥ १५॥

अहं हि लोकपालानां चतुर्थं स्रष्टुमुद्यतः ।
यमेन्द्रवरुणानां हि पदं यत्तव चेप्सितम् ॥ १६॥

तत्कृतं गच्छ धर्मज्ञ धनेशत्वमवाप्नुहि ।
यमेन्द्रवरुणानां हि चतुर्थोऽद्य भविष्यसि ॥ १७॥

एतच्च पुष्पकं नाम विमानं सूर्यसंनिभम् ।
प्रतिगृह्णीष्व यानार्थं त्रिदशैः समतां व्रज ॥ १८॥

स्वस्ति तेऽस्तु गमिष्यामः सर्व एव यथागतम् ।
कृतकृत्या वयं तात दत्त्वा तव महावरम् ॥ १९॥

गतेषु ब्रह्मपूर्वेषु देवेष्वथ नभस्तलम् ।
धनेशः पितरं प्राह विनयात्प्रणतो वचः ॥ २०॥

भगवँल्लब्धवानस्मि वरं कमलयोनितः ।
निवासं न तु मे देवो विदधे स प्रजापतिः ॥ २१॥

तत्पश्य भगवन्कं चिद्देशं वासाय नः प्रभो ।
न च पीडा भवेद्यत्र प्राणिनो यस्य कस्य चित् ॥ २२॥

एवमुक्तस्तु पुत्रेण विश्रवा मुनिपुङ्गवः ।
वचनं प्राह धर्मज्ञ श्रूयताम् इति धर्मवित् ॥ २३॥

लङ्का नाम पुरी रम्या निर्मिता विश्वकर्मणा ।
राक्षसानां निवासार्थं यथेन्द्रस्यामरावती ॥ २४॥

रमणीया पुरी सा हि रुक्मवैदूर्यतोरणा ।
राक्षसैः सा परित्यक्ता पुरा विष्णुभयार्दितैः ।
शून्या रक्षोगणैः सर्वै रसातलतलं गतैः ॥ २५॥

स त्वं तत्र निवासाय रोचयस्व मतिं स्वकाम् ।
निर्दोषस्तत्र ते वासो न च बाधास्ति कस्य चित् ॥ २६ ॥

एतच्छ्रुत्वा तु धर्मात्मा धर्मिष्ठं वचनं पितुः ।
निवेशयामास तदा लङ्कां पर्वतमूर्धनि ॥ २७ ॥

नैरृतानां सहस्रैस्तु हृष्टैः प्रमुदितैः सदा ।
अचिरेणैककालेन सम्पूर्णा तस्य शासनात् ॥ २८ ॥

अथ तत्रावसत्प्रीतो धर्मात्मा नैरृताधिपः ।
समुद्रपरिधानायां लङ्कायां विश्रवात्मजः ॥ २९ ॥

काले काले विनीतात्मा पुष्पकेण धनेश्वरः ।
अभ्यगच्छत्सुसंहृष्टः पितरं मातरं च सः ॥ ३० ॥

स देवगन्धर्वगणैरभिष्टुतस्
तथैव सिद्धैः सह चारणैरपि ।
गभस्तिभिः सूर्य इवौजसा वृतः
पितुः समीपं प्रययौ श्रिया वृतः ॥ ३१ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com